| Register Number: |
|---|
| Date: |

**ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27**

**B.Sc. B.A, B.COM & BBA - ISEMESTER**

**SEMESTER EXAMINATION: FEBRUARY 2022**

**SA 121 - SAMSKRIT**

**Time: 3 hrs** **Max Marks- 60**

**I. समुचितं उत्तरं चिनुत ।** **12×1=12**

अ. पञ्चतन्त्रस्य रचयिता कः?

१. विष्णुशर्मा २. भारविः ३. नायाणयपण्डितः ४. नारायणभट्टः

आ. मूषकः कस्य पाशविमोचनं कृतवान्?

१. हिरण्यकस्य २. पक्षिणः ३. कपोतस्य ४. मृगस्य

इ. महिलारोप्यस्य नातिदूरे कः पादपः अस्ति?

१. वटवृक्षः २. न्यग्रोधः ३. आम्रवृक्षः ४. दृढग्रन्थिः

ई. कः मन्थरकः?

१. मण्डूकः २. गृध्रः ३. मकरः ४. कूर्मः

उ. प्रीतिलक्षणं कति विधम्?

१. ६ २. ८ ३. २ ४. ५

ऊ. तण्डुलान् कः प्रसारितवान्?

१. राजा २. सैनिकः ३. लुब्धकः ४. कृषिकः

ऋ. वैरं कति विधम्

१. द्विविधम् २. त्रिविधम् ३. षड्विधम् ४. चतुर्विधम्

ऋ. स्वदेशे कः पूज्यते?

१. पण्डितः  २. विद्वान्  ३. राजा  ४. प्राचार्यः

ऌ. ताम्रचूडः कः?

१. आचार्यः  २.सन्यासी  ३. ग्रामीणः  ४. राजा

ए. अमरशक्तेः कति पुत्राः आसन्?

१. ३  २. ४  ३. ६  ४. २

ऐ. महिलारोप्य नगरे कस्य मन्दिरम् आसीत्?

१. विष्णोः  २. गणेशस्य  ३. शिवस्य  ४. नारायणस्य

ओ. केन सह सन्धी न कार्या?

१. वैरिणा  २. मित्रेण  ३. वृद्धेन  ४. जन्तुना

**II. श्लोकानां अर्थं लिखत ।** **3×3=9**

2. सम्पत्तौ च विपत्तौ च महतामेकरूपता।
   उदये सविता रक्तो रक्तश्चास्तमये तथा॥

औ. आरम्भगुर्वी क्षयिणी क्रमेण
   लघ्वी पुरा वृद्धिमती च पश्चात्।
   दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
   छायेव मैत्री खलसज्जनानाम्॥

अं. कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा।
   सम्भवेत्स महीपालस्त्रैलोक्यस्यापि रक्षणे॥

अः. सुहृदो भवने यस्य समागच्छन्ति नित्यशः।
   चित्ते च तस्य सौख्यस्य च किञ्चित्प्रतिमं सुखम्॥

**III. सविस्तरं लिखत ।** **2×10=20**

3. कालिदासस्य देश- काल-कृतिमधिकृत्य लिखत।

4. चित्रग्रीवकथां विस्तरेण लिखत।

5. संस्कृतभाषायाः वैशिष्ट्यं लिखत।

**IV. लघुटिप्पणीं लिखत** **3×3=9**

6. हितोपदेशः

क. तिलविक्रयकथा

ख. हिरण्यकः

ग. चित्रग्रीवः

**V. गद्यांशं पठित्वा समुचितम् उत्तरं लिखत** **5×2=10**

. महान् स्वतन्त्रतासेनानी स्वतन्त्रभारतस्य प्रथमः उपप्रधानमंत्री गृहमन्त्री च लौहपुरुषः सरदार वल्लभभाईपटेलमहोदयः 1875 तमे वर्षे अक्तूबरमासस्य एकत्रिंशत् तारिकायां जन्म अलभत। प्रान्तानाम् एकीकरणे केन्द्रीयां भूमिका निर्वहन् पटेलमहोदयः अद्यापि सर्वेषां भारतवासिनां श्रद्धाभाजनः। पटेलमहोदयं प्रति कृतज्ञता प्रकटयितुं गुजरातप्रान्तस्य तत्कालीनः मुख्यमन्त्री नरेन्द्रमोदीमहोदयः 2013 तमे वर्षे अक्तूबरमासस्य एकत्रिंशत् तारिकायां तस्य मूर्तेः शिलान्यासं कृतवान्। अस्याः विशालकायायाः मूर्तेः निर्माणे पञ्च वर्षाणां कालः उपयुक्तः। तस्यैव जन्मदिवसे अक्तूबरमासस्य एकत्रिंशत् दिनाङ्क एव भारतस्य प्रधानमन्त्रिणा नरेन्द्रमोदीमहोदयेन मूर्तिरियं राष्ट्राय समर्पिता। इयं प्रतिमा एकतायाः मूर्तिः ( स्टैच्यू ऑफ़ लिबर्टी ) इति नाम्ना ख्याता अस्ति | इदं स्मारकं सरदार सरोवरबन्धतः प्रायशः त्रिकिलोमीटरमितं दूरे साधूबेरनामके उपद्वीपे स्थितमस्ति। अस्याः प्रतिमायाः उच्चता द्वयशीत्यधिकशतमीटरमितम् ( 182 मी. / 597 फीट) अस्ति। इयं विश्वस्य उच्चतमा मूर्तिः अस्ति। मूर्तेः उच्चता पटेलमहोदयस्य व्यक्तित्वस्य कृतित्वस्य च उच्चतायाः सूचिका वर्तते।

7. भारतस्य प्रथमः उपप्रधानमन्त्री गृहमन्त्री च कः आसीत्?
घ. पटेलमहोदयः कस्मिन् केन्द्रीयां भूमिकां निर्वाहितवान्?
ङ. नरेन्द्रमोदीमहोदयेन मूर्ति: कस्मै समर्पिता?
च. पटेलमहोदयस्य प्रतिमा केन नाम्ना ख्याता?
छ. कः सर्वेषां भारतीयानां श्रद्धाभाजनः?